दिनाङ्क :- 12.07.2025

प्रात: - 06:55

## प्रधानमन्त्री वृत्यर्थ-मेलापकम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य विविधसर्वकारीयविभागेषु संस्थासु च नवनियुक्तानां यूनां कृते एकपञ्चाशत्सहस्रात् अधिकानि नियुक्ति-पत्राणि वीडियो-कान्फ़रेन्सिङ्ग् इति माध्यमेन वितरिष्यन्ते। अयं कार्यक्रमः सर्वकारस्य साम्प्रतिक रोज्गार्-मेला इत्युपपक्रमस्य भागः अस्ति। कार्यक्रमावसरे प्रधानमन्त्री नवनियुक्तान् कर्मकरानपि सम्बोधयिष्यति। षोडशतमः रोज्गार्-मेलेति कार्यक्रमः सम्पूर्णे देशे सप्तचत्वारिंशत् स्थानेषु भविष्यति। सम्पूर्णे देशे रोज्गार्-मेलानाम् माध्यमेन अद्यपर्यन्तं दशलक्षात् अधिकानि नियुक्ति-पत्राणि प्रदत्तानि।

## अमित शाह-केरला यात्रा

केन्द्रीयगृहमन्त्री अमितशाहः केरलस्य द्विदिवसीययात्रायै गतरात्रौ तिरुवनन्तपुरम् सम्प्राप्तवान्। विमानस्थानके भाजपेति दलस्य वरिष्ठनेतृभिः पक्षकार्यकर्तृभिः च तस्य स्वागतम् कृतम्। श्रीशाहः अद्य राज्यस्य राजधान्यां विभिन्नेषु कार्यक्रमेषु भागं ग्रहीष्यति। अद्य प्रातः सः भाजपा-पक्षस्य नूतनस्य राज्यकार्यालयस्य उद्घाटनं करिष्यति। पश्चात्, स: पुथारिकण्डम्-क्रीडाङ्गणे मतदानकेन्द्रस्तरीयाणां दलकार्यकर्तृणां विशालसभां सम्बोधयिष्यति। अपराह्णे, श्रीशाहः तालिपरम्बस्य राजराजेश्वर-मन्दिरे प्रार्थनां कर्तुं कन्नूर्-नगरं गमिष्यति, सायङ्काले देहलीनगरञ्च प्रत्यागमिष्यति इत्यपेक्ष्यते।

## एन. एस. ए. डोवाल-चेन्नै

राष्ट्रिय-सुरक्षा-परामर्शकः अजित-डोभालः अवदत् यत् सद्यः एव कृतस्य आपरेशन्-सिन्दूर-इत्यस्य समये, भारतदेश: पाकिस्तानान्तं नव आतंकवादिस्थानकानामुपरि लक्ष्यी कृतवान्, सीमायाः समीपे न, अपितु तस्यान्तप्रदेशेषु।

चेन्नै-नगरे आई आई टी मद्रास् इति संस्थायाः द्विषष्टितमायां वार्षिक-दीक्षान्तसभायां भाषणं कुर्वन्, श्रीडोभालः अवदत् यत्, आक्रमणानि तावत् सुनिश्चितानि आसन् यावत् भारतीय-सशस्त्र-सेनाः जानन्ति स्म यत् कः कुत्र अस्तीति?

श्रीडोभालः आपरेशन् सिन्दूर इत्यस्य विषये दुष्प्रचारं प्रसारयितुं विदेशीयमाध्यमानाम् निन्दाम् अपि अकरोत्।

निर्वाचन-आयोगः बिहारः

निर्वाचन-आयोगः अवदत् यत् बिहारस्य प्रायः दशमलवनवतिलक्ष्योत्तर-सप्त-कोटिमितानां निर्वाचकानां मध्ये चतुस्सप्तति-प्रतिशतादधिकाः जनाः गत सप्तदशदिनेषु स्वस्य गणना-प्रपत्राणि समर्पितवन्तः इति। आयोगः अवदत् यत् विशेष-गहन-संशोधनस्य द्वितीये चरणे मतदानकेन्द्र-स्तरीयाः अधिकारिणः निर्वाचकानां साहाय्यं कर्तुं, तेषां पूरितानि गणना-प्रपत्राणि सङ्गृहीतुं च प्रतिगृहं गच्छन्तः सन्ति।

डी. आर्. डी. ओ.-अस्त्र

रक्षानुसन्धान-विकास-सङ्घटनेन सह भारतीय-वायुसेनया च ह्यः स्वदेशनिर्मिताया: अस्त्र इति क्षिपण्याः उड्डयन-परीक्षणं सफलतया सम्पादितम्। परीक्षणं ओडिशा-राज्यस्य सुखोय्-30 एम्. के.-1 इति स्थलात् कृतम्।

संयुक्तानि राज्यम् NATO यूक्रैन

अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः अवदत् यत् सः नाटो इत्यनेन सह मैत्रिभावेन युक्रेन्-देशं प्रति शस्त्राणि प्रेषयितुं सन्धिं कृतवानिति। राष्ट्रपतिः ट्रम्पः ह्यः एकया वार्ता-वाहिन्या सह वार्तालापं कुर्वन् एतदुक्तवान्। अमेरिका-देशः पेट्रियाट्-वायु-रक्षा-प्रणालीति सहितं शस्त्राणि यूरोप्-देशे स्वस्य नाटो-मित्रराष्ट्राणां कृते विक्रययिष्यति, येन ते तान् युक्रेन्-देशाय दातुं शक्नुवन्ति।

टेस्ट्-क्रिकेट्- भारतम् इङ्ग्लेण्ड्ः

क्रिकेट्-क्रीडायां, अद्य लण्डन्-नगरस्य लार्ड्स्-क्रीडांगणे एण्डर्सन्-तेण्डुल्कर्-ट्रोफीति क्रीडायाः तृतीय-निकष-क्रीडायाः तृतीय-दिने आतिथेय-इङ्ग्लेण्ड्-देशं विरुध्य रात्रौ स्तोभत्रयाणां हानौ पञ्चोनसार्धैकशतधावमाङ्कान् कृत्वा भारतं स्वस्य प्रथम-पारीं पुनः आरभते। क्रीडायाः आरम्भः भारतीयसमयानुगुणं सार्धत्रिवादने दिवसि भविष्यति। इङ्ग्लैण्ड्-दलम् प्रथम-पार्यां सप्ताशीत्यधिकत्रिशतमेव अरचयत्।

विम्बेल्डन्ः

विम्बल्डन्-टेनिस्-क्रीडायां, पञ्चवारं ग्राण्ड्-स्लाम् इत्युपाधिधारिका इगा स्वियाटेक्, अद्य रात्रौ लण्डन्-नगरस्य सेण्टर्-कोर्ट् इति मध्ये महिला-एकलेति उपाध्यै अमण्डा अनिसिमोवा इत्यनया सह क्रीडिष्यति। एषा क्रीडा भारतीय-मानक-समयानुसारं सार्ध-अष्टवादने आरप्स्यते।